# Devaih Kritam Kartikeya Stotram 3

# देवैः कृतं कार्तिकेयस्तोत्रम् ३

## Document Information

Text title : Devaih Kritam Kartikeya Stotram 3

File name : devaiHkRRitaMkArtikeyastotram.itx

Category : subrahmanya, shivapurANa, AratI, stotra

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | kumArakhaNDa | adhyAya 12/2-6||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 19, 2024

*sanskritdocuments.org*

# देवैः कृतं कार्तिकेयस्तोत्रम् ३

देवा ऊचुः ।
नमः कल्याणरूपाय नमस्ते विश्वमङ्गल ।
विश्वबन्धो नमस्तेऽस्तु नमस्ते विश्वभावन ॥ २॥

नमोऽस्तु ते दानववर्यहन्त्रे बाणासुरप्राणहराय देव ।
प्रलम्बनाशाय पवित्ररूपिणे नमोनमश्शङ्करतात तुभ्यम् ॥ ३॥

त्वमेव कर्त्ता जगतां च भर्त्ता त्वमेव हर्त्ता शुचिज प्रसीद ।
प्रपञ्चभूतस्तव लोकबिम्बः प्रसीद शम्भ्वात्मज दीनबन्धो ॥ ४॥

देवरक्षाकर स्वामिन्रक्ष नस्सर्वदा प्रभो ।
देवप्राणावन कर प्रसीद करुणाकर ॥ ५॥

हत्वा ते तारकं दैत्यं परिवारयुतं विभो ।
मोचितास्सकला देवा विपद्भ्यः परमेश्वर ॥ ६॥

इति शिवपुराणे रुद्रसंहितायां कुमारखण्डे षष्ठाध्यायान्तर्गतं
देवैः कृतं कार्तिकेयस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । कुमारखण्ड । अध्याय १२/२-६ ॥

shivapurANa . rudrasaMhitA . kumArakhaNDa . adhyAya 12/2-6..

Proofread by PSA Easwaran

*Devaih Kritam Kartikeya Stotram 3*
pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*